# टिळक महाराष्ट्र विद्यापीठ, पुणे

**19R**

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : डिसेंबर – २०२३**

**सत्र ५ वे**

**विषय: रत्नावली (19R458)**

**दिनांक :१२/१२/२०२३** **गुण : ६०** **वेळ : स. १०.०० ते दु. १२.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १. मातृभाषया चतुर्णामनुवादः करणीयः।** **(२८)**

१) बाणाः पञ्च मनोभवस्य नियतस्तेषामसङ्ख्यो जनः।
प्रायोऽस्मद्विध एव लक्ष्य इति यल्लोके प्रसिद्धिं गतम्।
दृष्टं तत्त्वयि विप्रतीमधुना यस्मादसङ्ख्यैरयं
विद्धः कामिजनः शरैरशरणो नीतस्त्वया पञ्चताम्।।

२) मूले गण्डूषसेकासव इव बकुलैर्वास्यते पुष्पवृष्ट्या
मध्वाताम्रे तरुण्या मुखशशिनि चिराच्चम्पकान्यद्य भान्ति।
आकर्ण्याशोकपादाहतिषु च रसितं निर्भरं नूपुराणां
झङ्कारस्यानुगीतैरनुकरणमिवारभ्यते भृङ्गसार्थैः।।

३) परिम्लानं पीनस्तनजघनसङ्गादुभयतस्तनोर्मर्ध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः सन्तापं वदति नलिनीपत्रशयनम्।

४) समारूढा प्रीतिः प्रणयबहुमानदनुदिनं
व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया।
प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ
प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति।।

५) आक्षिप्तो जयकुञ्जरेण तुरगान् निर्वर्णयन्वल्लभान्
सङ्गीतध्वनिना हृतः क्षितिभृतां गोष्ठिषु तिष्ठन्क्षणम्।
सद्यो विस्मृतसिंहलेशविभवः कक्ष्याप्रदेशेऽप्यहो
द्वाःस्थेनैव कुतूहलेन महता ग्राम्यो यथाऽहं कृतः।

**प्र.२. ससन्दर्भ त्रयाणां स्पष्टीकरणं लिखत ।** **(१८)**

१. मयापि भर्तुः प्रसादेन क्रीडितमेव।
२. पृथ्वी खल्विदानीं हस्तगता प्रियवयस्य।
३. अहो प्रमादः परिजनस्य।
४. न कमलाकरमुज्झित्वा राजहंस्यन्यत्राभिरमते।
५. दर्शितं खलु मेधाविन्यात्मनो मेधावित्वम्।
६. कदापीदृक्षं घुणाक्षरं संभवत्येव।

**प्र.३. टिप्पणीद्वयं लिखत।** **(१४)**

१. लावाणकः
२. वसंतोत्सवम्
३. वसन्तकः
४. सुसंगता

----------